ॐ नमः श्रीवेङ्कटेश्वराय

सर्वेभ्यः स्वागतं ,नमस्कारं च

नाम- मौ देवनाथ

“काव्यप्रकाशस्य पञ्चमोल्लासपर्यन्तस्य महेशचन्द्रन्यायरत्न-जीवानन्दविद्यासागरविरचितयोः टीकयोः तुलनात्मकं समीक्षणम्”

इति शीर्षाङ्कितोऽयं।

अस्मिन् विषये पञ्चमोऽध्यायः परिकल्पितः।

# प्रथमोऽध्यायः

## आचार्यमम्मटस्य परिचयः

काव्यशास्त्राचार्येषु आचार्यमम्मटो विशिष्टं गौरवास्पदं स्थानम् च भजते। गौरवस्य हेतु तत्र तत्कृतकाव्यप्रकाशग्रन्थो वर्तते। अस्मिन्ग्रन्थे काव्यस्य सर्वेषामपि तत्त्वानां साङ्गोपाङ्गं विवेचनमस्ति। तथा च व्याकरणम्, दर्शनम्, स्मृतिशास्त्रम्, छन्दोशास्त्रम्, कामशास्त्रम्, कोशग्रन्थम्, इत्यादयः सामान्यमुलकेत्वेन विवेच्यन्ते। नाट्यशास्तरसम्बन्धिविषयान् परित्यज्य सर्वाण्यपि काव्याङ्गानि लेखकेन अत्र निरुपितानि। भरताद् आरभ्यः स्वसमयपर्यन्तं काव्यशास्त्रक्षेत्रे यावन्तः सिद्धान्ताः निरूपिताः तेषां सर्वेषामपि आचार्यमम्मटेन गहनमध्ययनं कृतम्। सर्वस्याऽपि साहित्यस्य मन्थनं कृत्वा तेन कृतः, तस्य सर्वस्य साररूपः पदार्थ एव काव्यप्रकाशः। अयं मम्मटोचार्यः ध्वनिविरोधिनां युक्तौः प्रबलप्रमाणैः खण्डयित्वा ध्वनिसिद्धान्तं पुनः प्रास्थापयत्। अतोऽयं ध्वनिस्थापनपरमाचार्य इति नाम्ना लोके प्रसिद्धो बभूव। साहित्यशास्त्रजगति काव्यप्रकाशं श्रेष्ठं काव्यशास्त्रविषयकं ग्रन्थं समालोचकाः वदन्ति, मम्मटाचार्यं च वाग्देवतावतार इति उपाधिना विभूषयन्ति।

समयः-एकादशशतकम्। काव्यप्रकाग्रन्थं विहाय आचार्यमम्मटस् शब्दव्यापरविचारः इति प्रसिद्धः ग्रन्थः वर्तते। सः ग्रन्थः निर्णयसागरप्रेससंस्थया प्रकाशितः भवति। अस्मिन् ग्रन्थे अभिधायाः लक्षणाश्च विस्तारेण वर्णनमकरोत्।

# टीका

टीकृ गतौ इति धातोः गुरोश्च हलः इति सूत्रेण अ प्रत्यये टीका शब्दः सिद्ध्यति। टीका शब्दस्यार्थो विविधकोशग्रन्थेषु विवक्षितः। तेषु शब्दकल्पद्रुमे-टीक्यते गम्यते प्रविश्यते ज्ञायते अनया। काव्यानुशासनमिति ग्रन्थे टीका निरन्तरव्याख्या इति मूलं सुगमानां विषमाणां च निरन्तरं व्याख्या यस्यां सा इति।

## टीकायाकरणस्योद्देश्यम्

टीकामाध्यमेन दुर्बोधग्रन्थाः अपि सरलाः सुबोधाश्च भवन्ति। वस्तुतः ग्रन्थकारापेक्षया टीकाकारस्य दायित्वमधिकं भवति। टीकाकारस्य कृते आवश्यकमस्ति यत् यस्मिन् काले ग्रन्थकारेण ग्रन्थस्य रचना कृता, तस्मिन् काले तत्तक्षेत्रेषु प्रचलितानां विचाराणाम् अध्ययनं कृत्वा ग्रन्थकर्तुः विचाराणाम् अभिव्यक्तिः कुर्यात् सहैव स्वकीये काले तत्तक्षेत्रे प्रचलितानां विचाराणां, स्वकीयानां विचाराणाञ्चापि अन्तर्भावः तत्र कुर्यात्।

# काव्यप्रकाशस्य टीकाविषये उक्तिः

यावन्तो हि टीकाग्रन्था अस्य ग्रन्थस्य प्रणिता न तावन्तोऽन्यस्य क्सापि काव्यशास्त्रीयग्रन्थस्य वर्तन्ते। आचार्यमहेश्वरभट्टेन स्वीयादर्शटीकायां प्रोक्तम्-

काव्यप्रकाशस्य कृता गृहे गृहे टीका तथाप्येष तथैव दुर्गमः।
सुखेन विज्ञातुमिमं य ईहते धीरः स एतां विपुलं विलोकताम्।

कमलाकरभट्टैरपि प्रोक्तम्

काव्यप्रकाशे टिप्पण्यः सहस्रं सन्ति यद्यपि।
ताभ्यस्त्वस्या विशेषो यः पण्डितैः सोऽवधार्यताम्।

काव्यप्रकाशटीकासु प्राचीनाः अर्वाचीनाः टीकाः प्रायः शतं टीकया प्रकाशिताप्रकाशितरूपेण लभ्यन्ते। तेषु पञ्चत्रिंशत् टीकाकाराणां परिचयः अस्मिन्शोधप्रबन्धे मया दत्तम्। आचार्यमाणिकचन्द्रविरचिता संकेतटीकायाः आद्याः आचार्यरत्नमिश्रविरचितां टीकामन्ते परिचयं उपस्थापितवान्। आङ्ग्लभाषया हिन्दीभाषया च अनुवादकाव्यप्रकाशस्य नाम उल्लेख्यं कृतम्।

इति प्रथमोऽध्यायः समाप्तम्।

# द्वितीयोऽध्यायः

## टीकाकारायोः परिचयः

- **महामहोपाध्यायः पंडितमहेशचन्द्रनारायणभट्टाचार्य** संस्कृतविद्वान् महेशचन्द्रन्यायरत्नः १८३६ तमवर्षे फेब्रुवरी २२ दिनाङ्के ब्रिटिश-भारतस्य वङ्गप्रदेशे कुलीनब्राह्मणवंशे जन्मलब्धम्। भारतीयसंस्कृतविद्वान् आसीत्, १८७६ तमवर्षे १८९५ तमवर्षे च संस्कृतमहाविद्यालयस्य प्राचार्यः आसीत्। ईश्वरचन्द्रविद्यासागरस्य मित्रं सहकर्मी च सः महत्त्वपूर्णां भूमिकां निर्वहति स्म। बङ्गालस्य पुनर्जागरणम्। १९ शतके कलकत्तानगरस्य प्रमुखेषु बङ्गलाजनानाम् एकः अन्यतम सुपुरुषः आसीत्।
- तस्य पिता हरिनारायण-तर्कसिद्धान्तः श्रीमद्भागवतस्य प्रसिद्धः टीकाकारः तथा च श्रीधरस्वामिनः वंशधरः आसीत्। सः पूर्वे मेदिनीपुरजिलायाः प्रसिद्धः वैयाकरणः ठाकुरदासचूडामणेः निकटात् व्याकरणपाठं समाप्तं अकरोत्।

- पंडितकुलपतिजीवानन्दविद्यासागरभट्टाचार्यस्य जन्म १८४४ तमे वर्षे बङ्गला चैत्रमासस्य अन्तिमे दिने श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यस्य अम्बिकादेव्याः च गृहे जन्मलब्धम्। सः मातापितरौ द्वितीयपूत्रमेव। पूर्ववङ्गस्य वरिशालजिलायाः वैचण्डी इति ग्रामनिवासी प.रामराम तस्य प्रपितामह आसीत्।
- सः पितुः अधीनं व्याकरणं-साहित्यं-अलंकारशास्त्रं-न्यायं-सांख्यं-पतञ्जलियोग-वेदान्तं-मीमांसा-ज्योतिषशास्त्रं-स्मृतिः इत्यादयः विविधाः विषयाः अधीतवन्तः। अतः एवमपि वक्तुं शक्यते- सः स्वयमेव संस्था आसीत्।

पण्डितजीवानन्दविद्यासागरभट्टाचार्यस्य सम्पूर्णाः कृतयः प्रायः २०० पुस्तकानि सन्ति। येषु केचन मूलतः तेन एव लिखिताः अन्ये च तेन टिप्पणीकृताः, सम्पादिताः, प्रकाशिताः च। तेषु वैदिकसाहित्यम्-पुराणम्-तन्त्रम्-मीमांसा-न्यायः-वैषाशिक-सांख्य-योगः-संस्कृतकाव्यं-व्याकरणम् इत्यादयः विषयाः सन्ति।श्रीसुदीप्तमुंशी श्रीजीवानन्द-विद्यासागरस्य संक्षिप्तजीवनं रेखाङ्कितं विरचितम्। अतः तत्रतः जीवानन्दविद्यासागरस्य जीवनवृतान्तं अवज्ञायते।

आचार्यमहेशचन्द्रन्यायरत्नः एव संस्कृताद्यमध्योपाधिपरिक्षाणां प्रवर्तकः आसीत्। स्वोद्योगेन प्रतिष्ठितः उच्च आंङ्गलमहाविद्यालयः वर्तमानसमये न्यायरत्न-इनस्टिटिउशन नाम्ना परिचितः। एशियाटिकसोसाइटिक् अर्थानुकुल्ये सायण-भाष्येण सह तैत्तिरीयसंहितायाः तृतीय-चतुर्थ-पञ्चखण्डाणामपि च शवरभाष्येण सह मीमांसादर्शनस्य सम्पादनाकार्यम् क्रियते। बङ्गपञ्जिकायाः संस्कारकार्येऽपि अस्य महद् योगदानम् आसीत्।

# काव्यप्रकाशग्रन्थस्य परिचयः

काव्यप्रकाशकारः आचार्यमम्मटः काव्यप्रकाशस्य विभागम् दशोल्लासेन प्रतिपादितम्। तेषु उल्लासेषु सर्वे उल्लासाः समनाः न वर्तन्ते। तृतीयषड् च इति उल्लासः परिमाणेलघु भवति। दशमोल्लासेऽपि विभागत्रयं परिलक्ष्यते। यथा- कारिकासूत्रमेति एकम्, द्वितीयं वृत्तिः, तृतीयम् उदाहरणं च इति।

उल्लासः इति शब्दस्य व्युत्पत्तिः पुंलिङ्गात्माकशब्दमेकमेव। उद् शब्दस्य लस् धातोः घञ् प्रत्ययेन उल्लासः इति शब्दस्य व्युत्पत्तिमभवत्।

काव्यप्रकाशस्य प्रथमभागं कारिका अस्ति। कारिकायाः लक्षणमेव विधीयते यत्-अल्पाक्षरत्वे सति बह्वर्थज्ञापकः श्लोकः, अर्थात् अल्पाक्षरेण श्लोकस्य वह्वार्थं प्रतिपादयति प्रकाशयति चेति। द्वितीयभागं तु वृत्तिः। तस्याः लक्षणं च– सूत्रमात्रव्याख्या। शाब्दबोधहेतुपदार्थोपस्थित्यनुकुलः पदपदार्थयोः स्मार्यस्मारकभावसम्बन्धः वृत्तिः। तृतीयभागं च- कस्यचिद्विषयस्य सप्रमाणत्वस्थापनार्थं तादृशविषयान्तरोल्लेखनं नाम उदाहरणमिति ज्ञायते।

# तृतीयोऽध्यायः

## प्रथमोद्वितीयोतृतीयोल्लासस्य तुलनात्मकं समीक्षणम्

**ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति।** अर्थात् काव्यप्रकाशकारः ग्रन्थारम्भे सर्वविधानां विघ्नानां विनाशाय समुचितदेवतां स्मरति। संस्कृतग्रन्थकाराणां इयं परम्परा विद्यते। तां परम्परामनुसृत्य आचार्यमम्मटेनापि स्वग्रन्थे काव्यप्रकाशे कृतमस्ति।

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥**

इत्यस्मिन् श्लोके विशेषणचतुष्टयद्वारेण आचार्यः प्रमाणयति, तत्रादौ-नियमेनानेन ब्रह्मसृष्टिर्बद्धा। यद्वा नियम्यते इति नियतिः संसारः तत्र कृतः दर्शितः नियमः जले पद्मम् इत्यादिरूपः। काव्यसृष्टौ कवीनां वन्धनं नास्ति। काव्ये कान्तायाः मुखकमलस्य सौरभं कविप्रतिभया व्यज्यते। ह्लादैकमयीमिति पदस्य ह्लादः सुखम् एकः केवलः दुःखासम्मिश्रः यस्मात् काव्यात् तन्मयों तत् स्वरूपाम् विविच्य जीवानन्दविद्यासागरेण अनन्यपरत्रामिति पदस्य व्याख्यां क्रियते। कविसृष्टिः परतन्त्रा नास्ति, पराधीनापेक्षया स्वाधीनस्योत्कृष्टयोगात् कविसृष्टेः आधिक्यस्य सर्वजनविदिताच्च। कविसृष्टौ उपयुक्ताः सर्वे रसाः आनन्ददायकाः परन्तु ब्राह्म-सृष्टौ सर्वे रसाः तथा न। केचन अप्रिया अपि। अतएव कविसृष्टिः विलक्षणा इति कथ्यते। आनन्दमयस्वभावेन काव्यरूपीजगतश्च निर्माय कवेः भारतीं सर्वोत्कृष्टशालिनी अस्ति। अतः यत् नितरां ब्रह्मसृष्टितः कविसृष्टेराधिक्यं वर्तते। टीकाकारस्य अभिप्रायम्।

# काव्यस्वरूपम्

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ॥**

तद् शब्दार्थौ अदोषौ सगुणौ अनलङ्कृतौ पुणः क्वापि इत्यस्य अन्वयः। शब्दार्थयोः प्रत्येकं न काव्यं वोधयति किन्तु परस्परविशिष्टौ एव तौ काव्यमिति। अर्थात् शब्दविशिष्ट अर्थः अर्थविशिष्टः शब्द इत्यर्थं बोधयति। गुणाः रसस्य द्वारभूतत्वं भवति मुख्य च। भावतदाभासादिध्वनौ अव्याप्तिः इति वाच्यं। भावतदाभासादीनां रतिस्थायिभावकत्वेन रतिस्थायिभावकधर्माः व्यज्यन्ते। अनलङ्कृती पुनः इति सर्वत्रश्लोके ईषदर्थरनञ् अप्यर्थकपुनः शब्देन च ईषदनीषदलङ्कारलाभात् अदर्शितत्वात् अर्थात् अत्र अनलङ्कृती इति पदे अल्पार्थको नञ् स्वीकृतः। अतएव अलङ्कारमात्रपर्यवसायिशब्दार्थयोः काव्यत्वमत्र निषिद्धं , यत्तु ध्वनिकारेण तृतीयोद्योते स्पष्टतया उक्तं –कविः रसादिपरः स्यात् न तु अलङ्कारवैचित्र्यमात्रपरः। रसयोजनकाले ये अलङ्काराः स्वतः प्रसङ्गवशादागच्छन्ति ते रसस्य उपकारकाः अन्यथा तु तेन रसभङ्गो भवति। अत्र उभयोः टीकाकारयोः शब्दान्तर्गतमतयोः वैषाम्यं दृश्यते।

# लक्षणा

वाक्यश्रवणानन्तरं कुत्रचित् स्थले तात्पर्यानुपपत्ति-योगात् एका शक्तिरङ्गीक्रियते। सा शक्तिः लक्षणा। मुख्यार्थबाधः मुख्यार्थयोगः, रूढिप्रयोजनयोरेकस्य सम्बन्धः च लक्षणानिमित्तिम् अपेक्षते। तद्यथा आचार्यमम्मटेन यत् प्रतिपादितम्-

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया॥**

अस्य श्लोकस्य अयम् आशयः मुख्यार्थे बाधिते सति, तस्य मुख्यार्थयोगे, सम्बन्धे, रूढे अथवा प्रयोजनद्वारा येन शब्दव्यापारेण अन्यार्थं बोधयति भवति, सः आरोपितः शब्दव्यापारः लक्षणा इति। लक्षणानां स्वीकारे हेतुत्रयं वर्त्तते। यथा- मुख्यार्थबाधः, तद्योगः, रूढिः अर्थात् प्रयोजनम्।

इत्यस्मिन् विषये जीवानन्दविद्यासागरेण यत् उच्यते- "मुख्यार्थबाधे तदुद्योगे च ज्ञाते सति रुढिज्ञानात् प्रयोजनज्ञानात् वा ज्ञातया यया वृत्त्या अन्यः अर्थः अथान्तरं लक्ष्यते प्रतिपाद्यते सा वृत्तिः लक्षणा। सा च वक्तुः तात्पर्य्यात्मिका एका"। तत्र आचार्यमहेशेन तथाच मुख्यार्थबाधादिहेतुवयसहकारेण मुख्यार्थातिरिक्तार्थप्रतिपादनात्मिका या आरोपिता नियततद्विषयविधुराऽपि तद्विषयकतया कल्पिता, शब्दस्य क्रिया वृत्तिः सा लक्षणा इत्यर्थः। सा च शक्यसम्बन्धरूपा वक्तृतात्पर्य्यरूपा पदार्थान्तरं वा इति उच्यते। यद् इति द्वयोः टीकयोः साम्यमिति मतं स्वीकरोति।

**वाच्यवैशिष्ट्यात् इति अर्थव्यञ्जकस्योदाहरणम्-**

**उद्देशोऽयं सरसकदली श्रेणिशोभातिशायी**
**कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।**
**किञ्चैतस्मिन्सुरतसुहृदस्तन्वि ते वान्ति वाता**
**येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥**

**अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।**

उद्देश्यमिदमस्ति। यथा- नायिकां प्रति रत्यार्थिनः कामुकस्य उक्तिः इयम्। नर्मदाया इति नर्मदा नाम। नर्म ददाति नर्मदा इति न तु नदीमात्रम्। तस्याः ऊर्धो देशः स्खलनभयेन सञ्चरतामनवलोकनीयः तिष्ठति इति अन्वयः। उद्देश्यः अयम् दुरादेव जनैः न पुनर्गम्यते इति निर्जनत्वं सूचयति। सरसानां स्निग्धानां कदलीनां श्रेण्या पङ्क्त्या या शोभा तया अतिशयो अतिशयितः। सरसपदेन शुष्कपत्रराहित्यात् ध्वनिराहित्यं, श्रेणीपदेन संचरतानां अनवलोकनीयता स्थानस्य च सूर्यतापराहित्यम् च वेष्टनं गम्यते। तथा कुञ्जानाम् उत्कर्षेण गुञ्जन्मधुकर करम्बित कुसुम समृद्ध्यादिरूपेणाङ्कुरितोऽभूत प्रादर्भूतो रमणीनां विभ्रमो विलासो यत्र सः। तथा च अनत्पन्नविलासानामपि नवनवोन्मेषशालि-विलासोदयाद् भवत्याः कामुकमेव मुख्ये दुरूत्तरं व्यसनं स्याद् इति भावः। एतस्मिन् प्रदेशे शैत्यमन्दसौगन्ध्यवत्तया प्रसिद्धा वाता वान्ति। येषां कामिजनं प्रति वातानामग्रे मनोभूः सरति चलति। मनोभूत्येन सचेतसां दुष्परिहर इति ध्वन्यते। कलितः धृतः अकाण्डेऽनवसरे निमित्ताभाव इति यावत् कोपो येन सः। सुरतवैमुख्ये तु दृढं कुपितः किमिव न करिष्यतीति व्यज्यते। अत्र रतार्थे प्रवेशः व्यङ्ग्यार्थं व्यज्यते, अत्रेति वाच्यवैलक्षणम्। अत्र नर्मदानां अत्र द्वयोः टीकयोः मतसाम्यं विदधति। अतः आचार्यमम्मटस्य मतेव आलोचना क्रियते।

# चतुर्थोऽध्यायः

## अर्थान्तरसंक्रमितध्वनेः उदाहरणम्

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥

अविवक्षितवाच्यध्वनौ यत्र वाच्यार्थस्य बाधानन्तरम् उपपद्यमानमपि अनुपयोगाद् रूपान्तरपरिणतः भवति तत्र अर्थान्तरसंक्रमितध्वनिः भवति।

अत्र वच्मि इति पदं सामान्यकथनात्मकं वाच्यार्थं विना उपदेशात्मकवचनं प्रति संक्रमितः अतः अर्थान्तरसंक्रमितवाच्यध्वनिः। एतस्मिन् प्रसङ्गे द्वाभ्यां टीकाकाराभ्यां मतमेव वैषम्यं विद्यते। अत्र जीवानन्दविद्यासागरः आदर्शटीकाम् अनुसृत्य अवर्णयत् “उपदेशस्य च परप्रवर्त्तकवचनरूपत्वेन तेन एव रूपेण अत्र वाच्यं वचनम् उपस्थितम् इत्यर्थः” इति। ‘अत्र परापमानदायित्वं प्रयोजनं गूढं व्यङ्ग्यम्’ इति व्यङ्ग्यरूपेण प्रतिपादितम्। एवञ्च महेशेन “यत् ‘वच्मि’ उपदिशामि इति लक्ष्यम्, तेन च हितसाधनत्वं व्यङ्ग्यम्” इति प्रतिपादितम्। अतः अस्मिन् प्रसङ्गे द्वयोः टीकयोः मते वैषम्यं लक्ष्यते।

## असंलक्ष्यक्रमव्यङ्ग्यध्वनिः(रसादिध्वनिः)

**यत्र रसस्य प्राधान्यामाविष्कर्तुं प्रथमं असंलक्ष्यक्रमव्यङ्ग्यध्वनिं निरूपयति यथा-**

रसभावतदाभासभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥

रसादयोऽष्टौ, ते च- रसः, भावः, रसाभासः, भावाभासः, भावशान्तिः, भावोदयः, भावसन्धिः, भावशाबलता चेति। मुख्यतः रसः ध्वनिरेव प्रधानं वर्तते। किन्तु केषुचिद् स्थानेषु भावध्वनेः अङ्गत्वेन रसानामुत्पत्तिः कविना क्रियते। रसादयः यत्र स्थितौ प्रधानतया भासन्ते तत्र अलङ्कारः ध्वनिः विद्यते। अर्थात् तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेयः उर्जस्वि-समाहित इत्यादयः अलङ्काराः भवन्ति। रसवदलङ्कारः रसस्य प्रधानाङ्गत्वेन वर्णने भवति, प्रेयोऽलङ्कारः भावस्य प्रधानाङ्गत्वेन वर्णने भवति, उर्जस्वि-अलङ्कारः रसाभास्य भावाभासस्य च प्रधानाङ्गत्वेन वर्णने भवति, समाहितोऽलङ्कारः भावशान्तेः अङ्गत्वेन वर्णने भवति। एतस्मिन् प्रसङ्गे आचार्यमम्मटस्य मतं स्वीकृत्य द्वाभ्यां टीकाभ्यां मतमेव साम्यं समानमेव मतम् उपस्थापितम्। जीवानन्दविद्यासागरेण विस्तरेण सुस्पष्टतया च आलोचना क्रियते। महेशेन सामान्यमतमेव प्रतिपादितम्।

# भट्टलोल्लटस्य उत्पत्तिवादः(मीमांसकः)

आचार्यमम्मटः स्वमतस्य निश्चयार्थं भरतस्य रससूत्रम् उपस्थाप्य प्रमुखानां चतूर्णां टीकाकाराणां मतानि प्रतिपादितानि। यथा- प्रथमं मतम् आचार्यभट्टल्लोटमतमस्ति।

आचार्यमम्मटेन मीमांसासम्प्रदायस्यायम् आचार्यः रससूत्रस्य प्रथमव्याख्याकार-रूपेण सम्मानितः अस्ति। एषः नामः उत्पत्तिवादः इति नाम्ना प्रसिद्धो वर्तते।

संयोगात् अर्थात् विभावैः उत्पाद्योत्पादकभावसम्बन्धात् रसस्य उत्पत्तिः। अनुभावेन गम्यगमकभावसम्बन्धात् रसस्य अभिव्यक्तिः, व्यभिचारिभावेन पोष्यपोषकभावसम्बन्धात् रसस्य पुष्टिः भवति इति विभावादिभिः जनितः, अनुभावैः प्रतीति-योग्यकृतः, सहकारिभिरुपचितः इति तेषां व्याख्यानात् ज्ञायते। उत्पाद्योत्पादकभावसम्बन्धात् रसानाम् उत्पत्तिर्भवति इति मतानामेव सारांशः।

एतस्मिन् प्रसङ्गे द्वयोरपि टीकयोः मते साम्यमस्ति। जीवानन्दविद्यासागरः महेशः च स्वस्यटीकायां आचार्यभट्टल्लोटस्य मतं सम्यक्तया प्रतिपादयतः। महेशेन तु भट्टल्लोटस्य मीमांसा-दर्शनज्ञानेन स्वीयमतम् उपस्थापितम्। यथा- रात्रौ असर्पभूतायां रज्जौ पथिकः सर्पज्ञानं कृत्वा भीतो भवति तथा अत्रापि सहृदयः अप्रकृतरामसीतादिनटे रामसीतादिरतिज्ञानं कृत्वा रसोत्पत्तिं लक्षयति। तथा सीतायाः अनुरागवशात् रामरतिरविद्यमाना भवति, परन्तु नाट्ये नैपुण्येन प्रतीयमानायाः सहृदयहृदये चमत्कारमपर्यन्तमेव रतेः व्यञ्जनयाऽभिवक्तिरेव रसंनिष्पत्तिः जायते।

## स्वतःसम्भविवस्तुना प्रवन्धगतवस्तुध्वनिः

**अलं स्थित्वा श्मशानेऽस्मिन्गृध्रगोमायुसङ्कुले।**
**कङ्कालबहले घोरे सर्वप्राणिभयङ्करे ॥९३ ॥**
**न चेह जीवितः कश्चित्कालधर्ममुपागतः।**
**प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥९४॥**

अर्थशक्तिमूलकध्वनेः स्वतःसम्भविवस्तुनः वस्तुध्वनेः द्वादशभेदाः कृताः। पदवाक्यत्वेन द्वादशभेदाः भवन्ति। पदवाक्यैः प्रबन्धः व्यज्यते। परस्परान्वितेन वाक्यस्य समूहेन प्रबन्धो भवति। यः प्रबन्धः सम्पूर्णं एकमेव विषयं प्रतिपादयति। यः प्रबन्धः एकग्रन्थरूपेण एव भवति। ग्रन्थस्य अवान्तरप्रकरणरूपे प्रबन्धो भवति। अर्थशक्त्युद्भव-ध्वनेः प्रबन्धगतत्वेन द्वादशभेदाः वर्त्तन्ते।

महाभारतस्य शान्तिपर्वस्य श्लोकद्वयं वर्तते। अस्मिन् प्रबन्धे वर्ण्यविषयः वस्तु अस्ति। तैः एकापरेभ्यः वस्तुध्वनिः भवति। अत्र गृध्रः प्रयत्नं करोति। केन प्रकारेण सः बालकस्य शवं त्यक्त्वा शीघ्रं आगच्छेत् एव शवं भक्ष्येत। यदि मोहशोकवशात् सूर्यास्तं भवेत् तर्हि मया बालकस्य शवं न भोक्तुं शक्यते इति अवगम्य तान् सर्वान् जनान् शीघ्रमेव गृहं गमनाय सम्मतिं ददाति।

अत्र स्वतःसम्भविना वाच्यार्थरूपेण वस्तुना पुरुषविसर्जनरूपं वस्तु पदद्वयात्मकेन प्रबन्धेन व्यज्यते। अस्मिन् प्रसङ्गे द्वयोः टीकयोः मतसाम्यं विद्यते।

# पञ्चमोऽध्यायः

**यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-**
**सूचीव्यधव्यतिकरेण युनक्ति कर्णौ।**
**काञ्चीगुणग्रथनभाजनमेष सोऽस्मि**
**जीवन्न सम्प्रति भवामि किमावहामि॥**

कामिन्याः कुचकलशम् इव यथा वस्त्राच्छादितं स्यात् तदेव चमत्कारि हृदयग्राहि च साहित्ये स्यात् श्रृङ्गारस्य आदरात्, न तथा आनन्ददायि अनावृतं स्फुटतया वाच्यतां प्राप्नोति। जीवानन्देन उक्तम्- व्यङ्ग्यस्य गूढत्वे ध्वनित्वम् एव। परन्तु यत्र व्यङ्ग्यार्थः अगूढः अर्थात् वाच्यस्वीयस्थितिं निर्वहन् अर्थविशेषे संक्रमितः स्यात् तत्र अर्थान्तरसंक्रमितवाच्यलक्षणामूलव्यङ्गस्य अगूढत्वप्राप्तिः स्यादेव। शत्रुभिः कृता अवमानना कर्णसमीपमागत्य तप्तसूचीभिः भेदनरूपेण युनक्ति। एष सोऽहं काञ्चीगुणग्रथनभाजनः अस्मि। अहम् अधुना जीवितः नास्मि। किं कर्तव्यम्? अस्मिन् प्रसङ्गे जीवानन्देन आचार्यमम्मटस्य मतं स्वीक्रियते परन्तु इतोऽपि एकः भिन्नः अभिप्रायः अपि दीयते। बृहन्नलादशायामर्जुनस्य अभिप्रायस्तावत् यत् **चक्रवर्ती तु मया कृता तिरस्कृतिः असुहृद् यस्य मम शरणागतः सन् तप्तसूचीनां वेधव्यतिकेरेण स्वकर्णौ** इति शरणागतस्य तप्तशलाकया कर्णवेधनमिति पाश्चात्याचारः प्रदर्श्यते। अत्र द्वयोः टीकयोः मध्ये साम्यञ्च दृश्यते।

**गुणीभूतव्यङ्ग्यस्य अवान्तरभेदः**

**एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत्॥**

**यथायोगमिति।**

**व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा।**
**ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात्॥**

**इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते न गुणीभूतव्यङ्गत्वम्।**

पूर्वे चतुर्थोल्लासे ध्वनिकाव्यस्य ५१ भेदाः दर्शिताः। यत्र व्यङ्ग्यस्य प्राधान्यम् अस्ति तत्र ध्वनिकाव्यम् एवं यत्र अप्राधान्यम् अस्ति तत्र गुणीभूतव्यङ्ग्यकाव्यम्। अतः ध्वनिकाव्यस्य भेदानाम् इव गुणीभूतकाव्यस्य भेदाः भवेयुः। परन्तु यत्र वस्तुमात्रेण अलङ्कारस्य अभिव्यक्तिः भवेत् तत्र गुणीभूतव्यङ्ग्यं न भवेत्। तत् सर्वदा ध्वनिकाव्यं हि भवति। अतः अलङ्कारव्यङ्ग्यस्य ९ भेदाः ५१ भेदतः न्यूनं कृत्वा गुणीभूतव्यङ्ग्यस्य भेदाः अवशिष्टाः। अतः गुणीभूतव्यङ्ग्यस्य अष्टभेदानां प्रत्येकं द्वाचत्वारिंशद्विधत्वमिति संयोजयित्वा ३३६ भेदाः शुद्धाः। एवमस्य संसृष्टसङ्कराभ्यां चतुरशीत्यधिकपञ्चशताधि-कैकपञ्चाशत्सहस्रोत्तरचतुर्लक्ष्यभेदाः (४५१५८४) संकीर्णाः। शुद्धभेदैः सह विंशत्यधिक-नवशतोत्तरैकपञ्चाशत्सहस्राधिकचतुर्लक्षभेदाः (४५१९२०)। अस्मिन् सन्दर्भे महेशचन्द्रः गुणीभूतव्यङ्ग्यकाव्यस्य भेदविषये आचार्यम-म्मटानुसारी, परन्तु अनन्तरं तेन तस्य अवान्तरभेदोऽपि आलोचितः। जीवानन्दः आचार्यमम्मटस्य मतं स्वीकरोति। अतः उभयोः टीकयोः मते सादृश्यं दृश्यते।

## वाचकव्यञ्जकशब्देषु भेदः

वाचकानामर्थापेक्षा व्यञ्जकानां तु न तदपेक्षत्वमिति न वाचकत्वमेव व्यञ्जकत्वम्। किं च वाणीरकुडङ्गित्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूपे एव यत्र विश्राम्यति।

वाचकव्यञ्जकौ समानौ न स्तः। तस्य हेतुः वाचकः सर्वदा अर्थसापेक्ष एवं व्यञ्जकः कदापि अर्थसापेक्ष न। यथा-गुणीभूतव्यङ्ग्यस्य उदाहरणं वाणीरकुडङ्गित्यादौ इत्यादिश्लोके उपपतिः लतागृहं प्रविशति इति प्रतीयमानार्थम् अभिव्यज्य नायिकायाः अङ्गशैथिल्यरूपवाच्यार्थः स्वयमेव विरतः। अत्र तु वाच्यार्थस्य चमत्कारात् असुन्दररूपं गुणीभूतव्यङ्ग्यम्। वाच्यार्थः तात्पर्यभूतः विधेयश्च एवम् अभिधाबोध्यः परन्तु व्यङ्ग्यार्थः अतात्पर्यभूतः एवं अभिधाबोध्यो न भवेत्। परन्तु बुद्धिस्थितः, अर्थात् अतात्पर्यभूतस्य असुन्दररूपे गुणीभूतव्यङ्गस्य बोधः केन व्यापारेण सम्भवेत्। अतः व्यञ्जना स्वीकरणीया।

अस्मिन् प्रसङ्गे जीवानन्दः आचार्यमम्मटस्य अभिप्रायं स्वीकुर्वन् आदर्शटीकानु-सारेण व्याख्यां प्रस्तोति। एवं महेशचन्द्रः आचार्यमम्मटस्य अभिमतं स्वीकरोति। अतः उभयोः टीकयोः मध्ये सादृश्यं दृश्यते।

# उपसंहारः

**तत्तत् त्वमेव भवतोऽस्ति न किञ्चिदन्यत्**
**संज्ञासु केवलमयं विदुषां विवादः ॥**

आचार्यमम्मटेन स्वग्रन्थे सर्वेषां काव्यशास्त्रकाराणां दार्शनिकानां मतानां च सम्यक्रूपेण समायोजनं कृतम्। कुत्रचित् तेषां खण्डनं, कुत्रचित् मण्डनं, कुत्रचित् स्वकीयमेव मतं प्रतिपादितम्। अतएव काव्यप्रकाशस्यावबोधनाय टीकाग्रन्थानामपेक्षा वर्तते। महेशचन्द्रजीवानन्दविद्यासागराभ्यां स्वव्युत्पत्या एतानि सर्वाणि स्थलानि स्पष्टीकृतानि। टीकाकाराभ्यां स्व-स्वटीकायां विभिन्नेभ्यः ग्रन्थेभ्यः उचितसन्दर्भाः उपस्थापिताः, विषयस्य स्पष्टविवेचनञ्च कृतम्। तत्तद्प्रसङ्गे स्वरचितानि अनेकानि पद्यानि उदाहरणरुपेणोपस्थाप्य, दुर्बोधस्थलानां सरला सुबोधा च व्याख्या कृता। काव्यप्रकाशात् पूर्वं लिखितानां प्रायशः सर्वेषां काव्यशास्त्रीयग्रन्थानां गहनाध्ययनपूर्वकं तेषां विवेचनमपि टीकाकाराभ्यां कृतम् इति टीकयोः अध्ययनेन विश्लेषणेन च ज्ञायते। काव्यप्रकाशात् पूर्वं लिखितेभ्यः विविधग्रन्थेभ्यः टीकयोः विविधप्रसङ्गेषु प्राप्तोद्धरणैः टीकाकारयोः विविधशास्त्राणां ज्ञानं प्रदर्शितं भवति। आभ्यां टीकाभ्यां तुलनात्मकेण काव्यप्रकाशः सरलतया अवगम्यते। एवञ्च अस्य शोधप्रबन्धेऽपि काव्यप्रकाशग्रन्थं पाठकाः सारल्येण अवगम्यन्ते।